श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ षड्त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्त्रिंशः सर्गः ॥

## देवैः पार्वतीशिवयोः सुरतक्रीडातो निवर्तनमुमादेव्या देवान् भूदेवीं चोद्दिश्य शापदानम्

उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ।
प्रतिनन्द्य कथां वीरावूचतुर्मुनिपुङ्गवम्॥ **1.36.1** ॥

धर्मयुक्तमिदं ब्रह्मन् कथितं परमं त्वया।
दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि।
विस्तरं विस्तरज्ञोऽसि दिव्यमानुषसम्भवम्॥ **1.36.2** ॥

त्रीन् पथो हेतुना केन प्लावयेल्लोकपावनी।
कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा॥ **1.36.3** ॥

त्रिषु लोकेषु धर्मज्ञ कर्मभिः कैः समन्विता।
तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः॥ **1.36.4** ॥

निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत्।
पुरा राम कृतोद्वाहः शितिकण्ठो महातपाः॥ **1.36.5** ॥

दृष्ट्वा च भगवान् देवीं मैथुनायोपचक्रमे।
तस्य सङ्क्रीडमानस्य महादेवस्य धीमतः।
शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम्॥ **1.36.6** ॥

न चापि तनयो राम तस्यामासीत् परन्तप।
सर्वे देवाः समुद्युक्ताः पितामहपुरोगमाः॥ **1.36.7**॥

यदिहोत्पद्यते भूतं कस्तत् प्रतिसहिष्यति।
अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन्॥ **1.36.8**॥

देवदेव महादेव लोकस्यास्य हिते रत।
सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि॥ **1.36.9**॥

न लोका धारयिष्यन्ति तव तेजः सुरोत्तम।
ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर॥ **1.36.10**॥

त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय।
रक्ष सर्वानिमाल्लोकान् नालोकं कर्तुमर्हसि॥ **1.36.11**॥

देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः।
बाढमित्यब्रवीत् सर्वान् पुनश्चेदमुवाच ह॥ **1.36.12**॥

धारयिष्याम्यहं तेजस्तेजसैव सहोमया।
त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु॥ **1.36.13**॥

यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम्।
धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः॥ **1.36.14**॥

एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम्।
यत्तेजः क्षुभितं ह्यद्य तद्धरा धारयिष्यति॥ **1.36.15**॥

एवमुक्तः सुरपतिः प्रमुमोच महाबलः।
तेजसा पृथिवी येन व्याप्ता सगिरिकानना॥ **1.36.16**॥

ततो देवाः पुनरिदमूचुश्चापि हुताशनम्।
आविश त्वं महातेजो रौद्रं वायुसमन्वितः॥ **1.36.17**॥

तदग्निना पुनर्व्याप्तं सञ्जातं श्वेतपर्वतम्।
दिव्यं शरवणं चैव पावकादित्यसन्निभम्॥ **1.36.18**॥

यत्र जातो महातेजाः कार्तिकेयोऽग्निसम्भवः।
अथोमां च शिवं चैव देवाः सर्षिगणास्तथा॥ **1.36.19**॥

पूजयामासुरत्यर्थं सुप्रीतमनसस्तदा।
अथ शैलसुता राम त्रिदशानिदमब्रवीत्॥ **1.36.20**॥

समन्युरशपत् सर्वान् क्रोधसंरक्तलोचना।
यस्मान्निवारिता, चाहं सङ्गता पुत्रकाम्यया॥ **1.36.21**॥

अपत्यं स्वेषु दारेषु नोत्पादयितुमर्हथ।
अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः॥ **1.36.22**॥

एवमुक्त्वा सुरान् सर्वाञ्शशाप पृथिवीमपि।
अवने नैकरूपा त्वं बहुभार्या भविष्यसि॥ **1.36.23**॥

न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता।
प्राप्स्यसि त्वं सुदुर्मेधो मम पुत्रमनिच्छती॥ **1.36.24**॥

तान् सर्वान् पीडितान् दृष्ट्वा सुरान् सुरपतिस्तदा।
गमनायोपचक्राम दिशं वरुणपालिताम्॥ **1.36.25**॥

स गत्वा तप आतिष्ठत् पार्श्वे तस्योत्तरे गिरेः।
हिमवत्प्रभवे शृते सह देव्या महेश्वरः॥ **1.36.26**॥

एष ते विस्तरो राम शैलपुत्र्या निवेदितः।
गङ्गायाः प्रभवं चैव शृणु मे सहलक्ष्मण॥ **1.36.27**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षड्विंशः सर्गः॥